# Ribhuproktam Sachchidanandarupatvanirupanam

# ઋભુપ્રોક્તં સચ્ચિદાનન્દરૂપત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Sachchidanandarupatvanirupanam

File name : RRibhuproktaMsachchidAnandarUpatvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 33| 26-41||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સચ્ચિદાનન્દરૂપત્વનિરૂપણમ્

(બ્રહ્મૈવ સચ્ચિદાનન્દમ્)
બ્રહ્મૈવ સચ્ચિદાનન્દં ઓતપ્રોતેવ તિષ્ઠતિ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વાકારં સનાતનમ્ ॥ ૩૩.૨૬॥

બ્રહ્મૈવ સચ્ચિદાનન્દં પરમાનદમવ્યયમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં માયાતીતં નિરઞ્જનમ્ ॥ ૩૩.૨૭॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સત્તામાત્રં સુખાત્સુખમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં ચિન્માત્રૈકસ્વરૂપકમ્ ॥ ૩૩.૨૮॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વભેદવિવર્જિતમ્ ।
સચ્ચિદાનન્દં બ્રહ્મૈવ નાનાકારમિવ સ્થિતમ્ ॥ ૩૩.૨૯॥

બ્રહ્મૈવ સચ્ચિદાનન્દં કર્તા ચાવસરોઽસ્તિ હિ ।
સચ્ચિદાનદં બ્રહ્મૈવ પરં જ્યોતિઃ સ્વરૂપકમ્ ॥ ૩૩.૩૦॥

બ્રહ્મૈવ સચ્ચિદાનન્દં નિત્યનિશ્ચલમવ્યયમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં વાચાવધિરસાવયમ્ ॥ ૩૩.૩૧॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સ્વયમેવ સ્વયં સદા ।
બ્રહ્મૈવ સચ્ચિદાનન્દં ન કરોતિ ન તિષ્ઠતિ ॥ ૩૩.૩૨॥

બ્રહ્મૈવ સચ્ચિદાનન્દં ન ગચ્છતિ ન તિષ્ઠતિ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં બ્રહ્મણોઽન્યન્ન કિઞ્ચન ॥ ૩૩.૩૩॥

બ્રહ્મૈવ સચ્ચિદાનન્દં ન શુક્લં ન ચ કૃષ્ણકમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વાધિષ્ઠાનમવ્યયમ્ ॥ ૩૩.૩૪॥

બ્રહ્મૈવ સચ્ચિદાનન્દં ન તૂષ્ણીં ન વિભાષણમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સત્ત્વં નાહં ન કિઞ્ચન ॥ ૩૩.૩૫॥

બ્રહ્મૈવ સચ્ચિદાનન્દં પરાત્પરમનુદ્ભવમ્ ।

બ્રહ્મૈવ સચ્ચિદાનન્દં તત્ત્વાતીતં મહોત્સવમ્ ॥ ૩૩.૩૬॥

બ્રહ્મૈવ સચ્ચિદાનન્દં પરમાકાશમાતતમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વદા ગુરુરૂપકમ્ ॥ ૩૩.૩૭॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સદા નિર્મલવિગ્રહમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં શુદ્ધચૈતન્યમાતતમ્ ॥ ૩૩.૩૮॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સ્વપ્રકાશાત્મરૂપકમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં નિશ્ચયં ચાત્મકારણમ્ ॥ ૩૩.૩૯॥

બ્રહ્મૈવ સચ્ચિદાનન્દં સ્વયમેવ પ્રકાશતે ।
બ્રહ્મૈવ સચ્ચિદાનન્દં નાનાકાર ઇતિ સ્થિતમ્ ॥ ૩૩.૪૦॥

બ્રહ્મૈવ સચ્ચિદાકારં ભ્રાન્તાધિષ્ઠાનરૂપકમ્ ।
બ્રહ્મૈવ સચ્ચિદાનન્દં સર્વં નાસ્તિ ન મે સ્થિતમ્ ॥ ૩૩.૪૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં સચ્ચિદાનન્દરૂપત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૩૩। ૨૬-૪૧॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 33. 26-41..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

---

*Ribhuproktam Sachchidanandarupatvanirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*